CC-0. Digitized by eGangotri and MIDF- Delhi

भैरव तन्त्र कवच

५६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशाय नमः॥ ॥श्रीभैरव उवाच॥ ॥कालीकु
लामृतानाथमहाविद्याविधाप्रभोः॥इदानींश्रोतु
मिच्छामिकवचंपूर्वसूचितं॥१॥त्वमेवशरणंनाथ
त्राहिमांदुःखसंकटात्॥भैरवउवाच॥रहस्य
मकवक्ष्यामिभैरवीप्राणवल्लभं॥श्रीजगन्मंगलंनाम
कवचंमंत्रविग्रहं॥पठित्वाधारयित्वेदंत्रैलोक्यंमोह
येत्क्षणात्॥नारायणोपियद्धृत्वानाभूत्वामहेश्वरं
॥योगेशंक्षोभमन्यद्यद्धृत्वाचेदंहरः॥वरहस्यं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जघानैवरावणादिनिशाचरान्॥यस्यप्रसादादीशोऽपि
त्रैलोक्यविजयीप्रभुः॥धनाधिपःकुबेरोपिसुरेशोभू
छचीपतिः॥एवंचसकलादेवाःसर्वसिद्धीस्वराःप्रि
योश्रीजगन्मंगलस्यास्यकवचस्यऋषिःशिवःछन्दो
नुष्टुप्देवताचकालिकादक्षिणेतिजगतांमोहनेऽ
क्षविजयेभुक्तिमुक्तिषु॥योविद्याकर्षणेचैवविनियो
गःप्रकीर्त्तितः॥शिरोमेकालिकापातुक्रींकारैकाक्षरी
परा॥क्रींक्रींक्रींमेललाटंचकालिकाखड्गधारिणी॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क. २

हूँ हूँ पातु नेत्र युग्मं ह्रीं ह्रीं पातु श्रुती मम॥ दक्षिणे कालिके
पातु घ्राण युग्म महेश्वरी॥ क्रीं क्रीं क्रीं रसनां पातु हूँ हूँ पातु
कपोलकं॥ वदनं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी॥
ह्रां विंशत्यक्षरी कल्पैः सर्वविद्या सुखप्रदा॥ खड्ग मुण्ड
धरा काली सर्वांङ्गमभितोऽवतु॥ क्रीं हूँ ह्रीं त्र्यक्षरी पातु चा
मुण्डा हृदयं मम:॥ ऐं हूँ ॐ ऐं सप्तदंष्ट्रं ह्रीं फट् स्वाहा क
कुत्तलं॥ अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका॥ क्रीं ऋषः
क्रीं हूँ हूँ ह्रीं ह्रीं कपालं पातु षडक्षरी मम॥ क्रीं नाभिं मध्यदेशं च २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दक्षिणेकालिकेऽवतु॥क्रीं स्वाहापातुमुखंमे कालिका
महाशाक्षरी॥हूं क्रीं दक्षिणेकालिके हूं हूं पातुकटि
हृदयं॥कालीदशाक्षरीविद्यास्वाहान्तासोरुयुगमकं॥
ॐ क्रीं क्रीं क्रीं स्वाहापातुकालिकाजानुनी सदा॥काली
हन्नामविद्येयंचतुर्वर्गफलप्रदा॥क्रीं हूं क्रीं सापातु
गुल्फौदक्षिणेकालिकेऽवतु॥क्रीं हूं क्रीं स्वाहापातुचतु
र्दशाक्षरीमम॥खड्गमुण्डधराकालीवरदाभयहारि
णी॥विद्याभिःसकलाभिःसासंवीतामभितोऽवतु॥काली

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपालिनीकुल्लारुरुकुल्याविरोधिनी॥विप्रचित्तान
थाचोग्राप्रभादीप्तापघनाहिति॥नीलाघनावलाका
चमात्रामुद्रासिताचमा॥एताःसर्वीरवदुधारासमाद
मालाविभूषणा॥रक्तोमान्त्रिविधिक्षुव्रालीनारा
यणीतथा॥माहेश्वरीचचामुण्डाकोमारीचापराजि
ता॥वाराहीनारसिंहीचसर्वास्त्रोमितभूषणा॥रक्तु
त्पलधरैर्दिक्षुविदिक्षुमांयथानथा॥इतितेकथितं
दिव्यंकवचंपरमाद्भुतं॥श्रीजगन्मङ्गलनामम्महाविद्यो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यविग्रहं॥त्रैलोक्याकर्षकवज्रलकवचमन्त्रस्यवोदितं
॥गुरुपूजांविधायाथाविधिवत्प्रपठेन्नरः॥कवचत्रिः
सकृद्वापियावज्जीवंचवापुनः॥एतत्कृतार्द्धमाहात्म्यत्रै
लोक्यविजयीभवेत्॥त्रैलोक्यक्षोभयत्येवकवचस्यप्र
सादतः॥सकलविभवेन्नासात्सर्वसिद्धीश्वरोभवेत्॥
लि पुष्याङ्गेन्कालिकायेमूलेनैवपठेत्सकृत्॥ज्ञानवर्ष
सहस्राणांपूजायाफलमाप्नुयात्॥भूर्जेविलिखितं
चैवस्वर्णस्थंधारयेद्यदि॥शिखायांदक्षिणेवाहौकं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेवाधारयेद्यदि॥त्रैलोक्यंमोहयेत्क्रोधात्त्रैलोक्यंच्
र्णयेत्क्षणात्॥पुत्रवाध्वनवान्श्रीमान्त्रावि
निधिर्भवेत्॥ब्रह्मास्त्रादीनिशस्त्राणितस्यस्पर्शना
न्ततः॥नाशमायान्तियानारीवंध्यावास्तनपुत्रिणी॥
करेवावामबाहेवाकंठेचस्यचधारणात्॥वश्यंपुत्रा
जीवत्संभवत्येवनसंशयः॥नदेयंपरशिष्येभ्यो
भक्तेभ्योविशेषतः॥शिष्येभ्योभक्तियुक्तेभ्यस्त्रायं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF--Delhi

थास्तत्सुमाप्नुयात्॥स्वर्भुक्त्वयकमलावादेवी
मन्दिरेमुदेवे॥योत्रान्तंस्थैर्यमास्थायनिवसत्ये
वनिश्चितं॥इदंकवचमज्ञात्वायोजपेद्दक्षकालि
काम्॥शतलक्षप्रजप्तापितस्यविद्यानसिध्यति॥
सशस्त्रघातमाप्नोतिसोऽचिरान्मृत्युमाप्नुयात्॥
इतिभैरवीतन्त्रेभैरवीभैरवसंवादेश्यामाकव
चंसंपूर्णम्॥शुभम्॥ ॥※॥ॐ॥※॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi